# Shri Vishnu Dvadasha Akshara Stotram

# श्री विष्णु द्वादशाक्षरस्तोत्रम्

## Document Information

Text title : Vishnu Dvadasha Aksharastotram

File name : viShNudvAdashAkSharastotram.itx

Category : vishhnu, dvAdasha

Location : doc_vishhnu

Author : gAyatrisvarUpa brahmachari

Proofread by : Vani V

Description/comments : shrI bhagavat viShNudvAdashAkSharastotram uttarArdhaH. Author/publisher comment mentions the cost of the book as bhagavadbhakti

Latest update : March 13, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 13, 2022

*sanskritdocuments.org*

# श्री विष्णु द्वादशाक्षरस्तोत्रम्

श्रीगणेशाय नमः ।

अथ ध्यानम् -

वन्दे चिन्मात्रमेकाक्षरमजममरं पूर्णमानन्दमात्रं
 वन्दे सद्ब्रह्मरूपं हरविधिविबुधैर्ध्यायमानं सुपूज्यम् ।
वन्दे सन्मन्त्रबीजं ऋषिगणनिकरैः स्तूयमानञ्च दिव्यं
 वन्दे संसारसारं सकलगुणनिधिं वासुदेवं वरेण्यम् ॥ १॥

अथ स्तोत्रम् ।

द्वादशाक्षरमन्त्रस्य ऋषिः प्रजापतिः स्मृतः ।
देवता वासुदेवश्च गायत्रीछन्द उच्यते ॥ १॥

ध्रुवो बीजं च हृच्छक्तिर्भुक्तिमुक्त्योश्च प्राप्तये ।
कृत्वैवं विनियोगञ्च प्राणायामं चरेत् ततः ॥ २॥

पूरके षोडशावृत्या कुम्भके द्वादशस्मृतः ।
रेचके तु दशावृत्या प्राणायामविधिं चरेत् ॥ ३॥

नासाग्रे लोचनकृत्वा मध्ये हृद्कमलेस्थितं !
ध्यायेन्नारायणं देवं व्यापकं ब्रह्मरूपिणम् ॥ ४॥

शङ्खचक्रगदापद्मधरं नीलं चतुर्भुजम् ।
पीताम्बरधरं देवं विष्णुं कमललोचनम् ॥ ५॥

तुलसीदलसंयुक्तवनमालासुशोभितम् ।
सुवर्णमुकुटं रम्यं दिव्यकुण्डलभूषितम् ॥ ६॥

असङ्ख्यचन्द्रसङ्काश साक्षाद्ब्रह्मसनातनम् ।
कैवल्यमोक्षदं सत्यरूपं विश्वात्मकं विभुम् ॥ ७॥

अथवा राधिकानाथं द्विभुजं मुरलीधरम् ।
आजानुबाहुकं दिव्यवदनं श्यामसुन्दरम् ॥ ८॥

मणिमन्मुकुटं तद्वत् कुण्डलं पीतवाससम् ।
कस्तूरीतिलकं यस्य ललाटे सर्वमोहनम् ॥ ९॥

तुलसीमालया पद्ममालया मणिमालया ।
शोभितं शान्तिदं कृष्णमन्तर्हृत्कमलेस्थितम् ॥ १०॥

ध्यात्वैवं पुरूषं पूर्णं वासुदेवं सनातनम् ।
राजमन्त्रजपं कुर्यात् द्वादशाक्षरनामकम् ॥ ११॥

जपान्ते श्रद्धयायुक्तः पाठं कुर्यात् प्रयत्नतः ।
तं दृष्ट्वा भक्तिसंसक्तोवासुदेवः प्रसीदति ॥ १२॥

ॐ नमो भगवते वासुदेवाय ।
(ॐ) ओङ्कार मन्त्रमय पूज्य सदक्षराय
पादत्रयाक्षरमयाय त्रयीश्वराय ।
वेदत्रयाय त्रिगुणात्मत्रिदैवताय
तस्मै नमो भगवते परमामृताय ॥ १३॥

(न) नम्याय सर्वजनहृत्कमलस्थिताय
चाङ्गुष्ठमात्रपुरूषाय विभुत्वगाय ।
ज्योतिर्मयाय तिमिरान्तकनिर्मलाय
तस्मै नमो भगवते परमामृताय ॥ १४॥

(मो) मोक्षप्रदाय सुखदाय धनप्रदाय
ज्ञानप्रदाय सततं परमोज्ज्वलाय ।
ब्रह्मादिदेव निकरैश्च सुपूजिताय
तस्मै नमो भगवते परमामृताय ॥ १५॥

(भ) भक्तस्य दुःखदलनाय च रक्षकाय
धर्मस्य सन्ततमधर्मविनाशकाय ।
नानावतारपृथिवीतलधारणाय
तस्मै नमो भगवते परमामृताय ॥ १६॥

(ग) गव्यप्रियाय सकलेप्सितसम्प्रदाय
सत्यप्रवृद्धिकरणाय सुमङ्गलाय ।
कृष्णावतारकरुणालयसद्व्रताय

तस्मै नमो भगवते परमामृताय ॥ १७॥

(व) वन्द्याय सर्वजगतां सुरसत्तमाय
वंशीविभूषितकराय मनोहराय ।
नाना प्रपञ्च विलयोदय कारणाय
तस्मै नमो भगवते परमामृताय ॥ १८॥

(ते) तेषांहि दुष्टशिशुपालककंशकेशि
कालीयकालयवनादि खलेश्वराणाम् ।
मानंविमर्द्य जगतीतल रक्षणाय
तस्मै नमो भगवते परमामृताय ॥ १९॥

(वा) वासांसि यस्य सकलानि तडिन्निभानि
रूपं नवीन घनसन्निभमाद्यवर्णम् ।
नारायणाय नररूप-विभूषिताय
तस्मै नमो भगवते परमामृताय ॥ २०॥

(सु) सुन्दोपसुन्ददलनाय सुदर्शनाय
हृत्पद्मनिष्ठ शुभविग्रह शोभिताय ।
सद्ब्रह्मचिद्घनपरात्परकेवलाय
तस्मै नमो भगवते परमामृताय ॥ २१॥

(दे) देवाय भक्तभवसागरतारणाय
दुर्दन्तवक्रशिशुपालक कर्दनाय ।
लीलार्थमेव जगतीतलमागताय
तस्मै नमो भगवते परमामृताय ॥ २२॥

(वा) वायुस्तथैव वरुणोऽग्नि शशाङ्करुद्रा
इन्द्राश्विनीसुतकुबेरयमा अजश्च ।
स्तुन्वन्ति यं सततमेव समस्त वेदाः
तस्मै नमो भगवते परमामृताय ॥ २३॥

(य) यस्याक्षरस्य निरवद्यनिरञ्जनस्य
संसारदुःखरहितस्य सुदुर्लभस्य ।
जानन्ति नैव महिमानमशेष जीवा
तस्मै नमो भगवते परमामृताय ॥ २४॥

द्वादशाक्षरनामाख्यं स्तोत्रं यद्रचितं मया ।
समर्पयामि देवाय कृष्णाय परमात्मने ॥ २५॥

द्वादशाक्षरसंयुक्तं स्तोत्रं सर्वोत्तमं शिवम् ।
यः पठेत् प्रातरुत्थाय ज्ञानं सद्यः स विन्दति ॥ २६॥

सदा सद्भक्तिभावेन ध्यात्वा हरिपदामृतम् ।
पाठमात्रेण सद्भक्तो गच्छेद्धि हरिमन्दिरम् ॥ २७॥

इति श्री गायत्रीस्वरूप ब्रह्मचारिणा विरचितं श्री विष्णु
द्वादशाक्षरस्तोत्रं सम्पूर्णम् ॥

Proofread by Vani V

*Shri Vishnu Dvadasha Akshara Stotram*

pdf was typeset on March 13, 2022

Please send corrections to *sanskrit@cheerful.com*